5

CHUNILAL GANDHI VIDYABHAVAN
SURAT.

Manuscripts Library

S.D.P.B.

Coll. No. 764

Title Ātmānanda.

CHUNILAL GANDHI VIDYABHAVAN, SURAT

Shastri Dinmanishankar Pustak-Bhandara

No.: 764 Subject: Vedānta.

Title: Ātmānanda.

Author: Vidyāraṇya Scribe: —

Date of the work: — Date of the Ms.: —

Place of the work: — Place of the Ms.: —

Size: 11.2" by 5.2" Extent: 18 foll.

Language: Sanskrit. Script: Devanāgarī

Remarks: ——

आ॰ष्ट श्रीगणेशाय नमः ॥ ॥ तदेवं प्रथमेऽध्याये विवेकिनो योगेन निजानंदानुभवप्रकारं प्रदर्श्य मूढस्य जिज्ञासो
रात्मानंदवासनत्वंपदार्थविवेचनमुखेन ब्रह्मानंदानुभवप्रकारप्रदर्शनाय शिष्यमवतारप्रश्नंति ॥ नन्वे प
वमिति ॥ शिष्येणैवं पृष्टो गुरुरतिमूढस्य विद्याधिकार एव नास्तीत्याह ॥ धर्मेति ॥ एषोऽतिमूढो नादौ संसारेऽस्मि
न्नीति पुनर्जन्मस्वनुष्ठितसुकृतदुष्कृतवशान्नानाविधदेहस्वीकारेण पुनः पुनर्जायतां म्रियतां चेत्यर्थः ॥

नन्वेवं वासनानंदाद्ब्रह्मानंदादपीतरं ॥ वेत्ति योगी निजानंदं मूढस्यात्रास्ति का गतिः ॥ ३ ॥ धर्माधि
र्मवशादेष जायतां म्रियतामपि ॥ पुनः पुनर्देहलक्षैः किं नो दाक्षिण्यतो वद ॥ अत्रास्ति वो नु जिघृ
क्षुत्वाद्दाक्षिण्येन प्रयोजनं ॥ तर्हि ब्रूहि स मूढः किं जिज्ञासुर्वा पराङ्मुखः ॥ ३ ॥ ॥

वायुं ॥ अथ सर्वत्र आह कत्वा दाचा येण तस्यापि काचन गतिर्वक्तव्येति शिष्य आह ॥ अस्तीति ॥ वो युष्माक
मनुजिघृक्षुत्वादनुग्रहीतुमिच्छतोऽनुजिघृक्षावस्तेषां नावस्तत्वं तस्माद्दाक्षिण्योद्धरणे ब्रायुक्तत्वाद्दाक्षिण्ये अ॰
तस्तदुद्धरणे प्रयोजनमस्तीत्यर्थः ॥ एवं च शिष्यवचनमाकर्ण्य गुरुस्तं विकल्प्य पृच्छति ॥ तर्हीति ॥ यदि
मूढस्यापि काचन गतिर्वक्तव्या तर्हि स मूढः किं रागी विरक्तो वा न वेदिति ॥ ३ ॥ ॥ २

रागी चेत्तद्रागानुसारेण कर्म वोपासनं वा वक्तव्यमिति प्रथमे परिहारमाह ॥ उपास्तीमिति ॥ विशुद्धाय
तत्वज्ञानविशुद्धाय बहिर्मुखायेत्यर्थः ॥ यथोचितं यथायोग्यं ब्रह्मलोकादिकामस्योपास्तिं ब्रूयात्स्वर्गा
दिकामस्य कर्म ब्रूयादित्यर्थः ॥ जिज्ञासुत्वेऽपि सोऽतिविवेकी मंदप्रज्ञो वेति विकल्प्यातिविवेकिनः पूर्वाध्या
योक्तप्रकारेण योगेन ब्रह्मसाक्षात्कारमभिप्रेत्य मंदप्रज्ञस्य तद्दर्शनोपायमाह ॥ मंदप्रज्ञं त्विति ॥

उपास्तिं कर्म वा ब्रूयाद्विशुद्धाय यथोचितं ॥ मंदप्रज्ञं तु जिज्ञासुमात्मानंदेन बोधयेत् ॥ ४ ॥ बोध
यामास मैत्रेयीं याज्ञवल्क्यो निजप्रियां ॥ न वा अरे पत्युरर्थे पतिः प्रिय इतीरयन् ॥ ५ ॥

यो मंदप्रज्ञः ॥ मंदा जडा प्रज्ञा बुद्धिर्यस्य स मंदप्रज्ञस्तं जिज्ञासुं ज्ञातुमिच्छुं जिज्ञासुमात्मानंदेनात्मानं
दविवेचनमुखेन बोधयेत् ॥ ४ ॥ एवं केन को बोधित इत्यत आह ॥ बोधयेति ॥ याज्ञवल्क्य एतन्नामको मृ
गुः शाखाविशेषप्रवर्तकः कश्चिदृषिः मैत्रेयीमेतन्नामिकां निजप्रियां स्वभार्यां न वा अरे पत्युरर्थे पति
प्रिय इति ॥ न वा अरे पत्युः कामाय पतिः प्रियो भवतीत्यादिप्रकारेणेरयन्ब्रुवन्बोधयामास बोधि
तवानित्यर्थः ॥ ५ ॥ ॥

उक्तरत्नचपरप्रेमास्पदत्वेन परमानंदरूपतां इति वाक्येन परप्रेमास्पदत्वहेतुना आत्मनः परमानंदरूप
तां सिसाधयिषुरादौ परप्रेमास्पदत्वहेतुसमर्थनाय तावदुदाहृतवाक्यमुपलक्षणपरतानिर्देशपुरस्स
करणं सकलपर्यायवाक्यतात्पर्यमाह। पतिरिति। पतिर्जायादिकं नोऽस्मात्तं मोक्षदोषपत्नीभोक्तृसं
बंधेनैव प्रियं न स्वरूपेणेत्यभिप्रायः॥१३॥ इदानीं पूर्वोदाहृतमपि न वा अरे पत्युः कामाय पतिः प्रियो भ

पतिर्जायापुत्रवित्ते पश्चब्राह्मणादिकं नाः॥ लोकादिवेदसत्तं च सर्वं चात्मार्थतः प्रियं॥६॥
यस्माद्विद्यामदा पत्न्या तदा प्रीतिं करोति सा॥ क्षुत्तृष्णा न रागाद्यैस्तदा नेच्छति तत्पतिः॥७॥

वतीत्यात्मनस्तु कामाय पतिः प्रियो भवतीत्यस्य वाक्यस्य तात्पर्यार्थं विभज्य दर्शयति। पत्न्या इति॥
यदा यस्मिन्काले पत्न्याः जायायाः पत्यौ भर्तरि विषये इच्छा भवति तदा सा पत्नी पत्यौ प्रीतिं स्नेहं क आत्मा
रोति। यदा तत्पतिः क्षुदादिना बाधाबहेतुना युक्तो भवतीति तदा तं नेच्छति न कामयते॥७॥ ॥ २

एवं च सति किं फलितमित्यत आह। न पत्युरिति। यया क्रियमाणा या प्रीतिः सा न पत्युरर्थे पत्युः प्रयोजनाय
न किं तु जायायाः पत्यौ प्रीतिं स्वार्थमेव स्वप्रयोजनायैव करोति। न वा अरे जायायै कामाय जाया प्रिया भवति
आत्मनस्तु कामाय जाया प्रिया भवतीत्याह। न वा अरे सर्वस्य कामाय सर्वं प्रियं भवत्यात्मनस्तु कामाय सर्वं प्रि
यं भवतीत्येतानां वाक्यानां तात्पर्यं क्रमेण विभज्य दर्शयति। पतिश्चेत्यादिना। पतिश्च भर्तापि स्वप्रयोज

न पत्युरर्थे सा प्रीतिः स्वार्थमेव करोति तां॥ पतिश्चात्मन एवार्थे न जायार्थे कदाचन॥८॥ अस्तो
मभ्भरणेप्येवं स्वेच्छयैव प्रवर्तनं॥ श्मश्रुकंटकवेधेन बालरुदति तत्पिता॥ चुंबत्येव न सा प्रीति
बाल्यार्थे स्वार्थ एव सा॥९॥

नायैव जायायां प्रीतिं करोति न जायाप्रीतये इत्यर्थः। नन्वेकैककामनया प्रवृत्तौ प्रीतिः स्वार्था भवतु युग
पदुभयेच्छया प्रवृत्तौ तु प्रीतिरुभयार्थता स्यादित्याशंक्याह। श्मश्र्विति। एवमुक्तेन प्रकारेण स्वेच्छयैव स्व
कामनापूरणेच्छयैव प्रवर्तनमुभयोरपि प्रीतिविशेषः स्वेच्छया प्रवर्तनं तत्समेव दर्शयति॥ श्मश्रुकंटकेति॥
पित्रा क्रियमाणं पुत्रमुखादिचुंबनेन पुत्रप्रीत्यर्थं तस्य श्मश्रुकंटकवेधेन रोदनकर्तृत्वात्तस्य पितुः स्वतुष्ट
यमिवेत्यगम्यमित्यर्थः॥१०॥

चेतनेषु पतिजायादिपुत्रेषु क्रियमाणायाः प्रीतेः स्वार्थत्वपरार्थत्वसंदेहं मा न वा स्य चेतनत्वेनेत्यामात्ररहि
तस्य वित्तविषयस्य तत्वं कैवनास्तीत्यभिप्रेत्य नवाअरे वित्तस्य कामायेत्यादिवाक्यस्य तात्पर्यमाह ॥ निरि
च्छमपीति ॥ १० ॥ चेतनत्वेपि वहनादीच्छारहितपशुविषयस्य नवाअरे पशूनामित्यस्य वाक्यस्य तात्पर्यमा
ह ॥ वाहयितुं काम्यते तत्र वहनादिविषयायाः प्रीतेर्वाणिगर्थं नैव न बलीवर्दार्थत्वमित्यर्थः ॥ ११ ॥ नवाअरे

निरिच्छमपि रत्नादि वित्तं यत्नेन पालयन् ॥ प्रीतिं करोति स स्वार्थे वित्तार्थत्वं न शंक्यतां ॥ १० ॥ सु
बलिबलिवर्दैर्विवाहयिषते बलात् ॥ प्रीतिं सा वाणिगर्थैव बलीवर्दार्थता कुतः ॥ ११ ॥ ब्राह्मण्येप्येवमेत्ति
पूज्योहमिति तुष्यति पूजया ॥ अचेतनायां जातेर्नो संतुष्टिः पुंस एव सा ॥ १२ ॥ क्षत्रियोहं तेन राज्यं क
रोतीत्यसत्र राजता ॥ नजाते वैश्यजात्यादौ योजनायेदमीरितं ॥ १३ ॥

नवाअरे ब्रह्मणः कामायेति वाक्यस्य
तात्पर्यमाह ॥ ब्राह्मण्येपि सन्निमित्तया पूजया ब्राह्मणोहमस्मीत्यभिमानवानेव तुष्यति न जडजातिरित्य
र्थः ॥ १२ ॥ नवाअरे क्षत्रस्येत्यादिवाक्यस्य तात्पर्यमाह ॥ क्षत्रियइति ॥ राज्योपभोगनिमित्तं सुखं क्षत्रियएवातिमत् आत्मा ३
एव न क्षत्रत्वजातेरित्यर्थः ॥ इदं क्षत्रियोदाहरणं वैश्यादावप्युपलक्षणार्थमित्याह ॥ वैश्येपेति ॥ १३ ॥ + अनिच्छती
ति ॥ बलीवर्दैस्त्वनुदुहिच्छन्निच्छति भारं वोढुमिच्छामकुर्वत्स्वपि बलाद्विवाहयिषते + टी॰

नवाअरे लोकानां कामायेत्यादिवाक्यस्य तात्पर्यमाह ॥ स्वर्गेति ॥ लोकद्वयोपादानं कर्मोपासनाजन्यलोकसाधनद्व
यं संपाद्यमकललोकोपलक्षणार्थं ॥ १४ ॥ किंच ॥ ईशेति ॥ पापनंगपापनिवृत्तयेत्यर्थः ॥ तत्पूजनं न निःपापदेवार्थं
स्वतः पापरहितानां न देवानां प्रयोजनाय किंतु स्वार्थं पूजाकर्तुः प्रयोजनाय ॥ १५ ॥ किंच ऋगादय इति ॥ ब्रा
ह्मणेन बालत्वं तच्च ब्राह्मण्ये मनुष्यत्वावान्तरजातिरूपं तद्भूषणे हितेषु वेदेषु न प्रयुज्यत इत्यर्थः ॥ १६

स्वर्गलोकब्रह्मलोकौ स्वाम्यमेतत्यभिवांछनं ॥ लोकयोर्नोपकाराय स्वभोगायैव केवलं ॥ १४ ॥ ईश्व
विष्ण्वादयो देवाः पूज्यंते पापनष्टये ॥ न तत्रिःपापदेवार्थं स्वार्थे तत्तु प्रयुज्यते ॥ १५ ॥ रामादयोप्यधीयंते
ब्राह्मण्येपानवाप्तये ॥ न तत्वसर्वं वेदेषु मन्त्रप्येषु प्रसज्यते ॥ १६ ॥ भूम्यादिपंचभूतानि स्थानतृट्पाक
शोषणे ॥ हेतुमिच्छावकाशेन वांछन्त्येषां न हेतवे ॥ १७ ॥

किंच भूम्यादीति ॥ सर्वप्राणिनो स्वस्थानप्रदानतृष्णिवारणपाककरणाद्रीशोषणावकाशप्रदानाख्येहे
तुनिमित्तैः पृथिव्यादीनि पंचभूतानि वांछन्ति ॥ अपेक्षंते एषां पृथिव्यादीनां तु हेतवं स्वस्थानदानादीनि
निमित्तानि नसंतीच्छंतीति न स्वयमाकांक्षंतीत्यर्थः ॥ १७ ॥ ॥

इदानींनवाअरे सर्वकामायेत्यस्य वाक्यस्य तात्पर्यमाह ॥ स्वामीनृपादीति ॥ नृपादिसेवंजिनः स्वाम्यादिकं सर्वं
स्वोपस्कारायस्वप्रयोजनायवांछति एवंस्वाम्यादिरपि ॥१८॥ ननुश्रुतावेवं नकुदाहरणदर्शनं किमर्थंकृत
मित्याशंक्याह ॥ सर्वेति ॥ इच्छापूर्वकेषु सर्वेष्वपि भोजनादिव्यवहारेषु एवमात्मनस्तु कामाय सर्वंप्रियंभ
वतीत्येकेन प्रकारेण अनुसंधातुं अनुसंधानाय ईदृशं पतिजायादिषु प्रीतिदर्शनरूपं उदाहरणबाहु

स्वामिन्नृपादिकं सर्वंस्वोपस्कारायवांछति ॥ तत्राकृतोपकारस्तु तस्यतस्यनविद्यते ॥ तेनैको ॥१८
सर्वमेवंकृतिष्वेवमनुसंधातुमीदृशं ॥ उदाहरणबाहुल्यंतेनस्वास्ययेन्मति ॥१९॥ अथकेयंभवे
त्प्रीतिःश्रूयतेयानिजात्मनि ॥२०॥
उक्तमितिविशेषः ॥ तेनकारणेन स्वांस्वसंबंधीनिमित्तंबुद्धि
वामयेत्सर्वस्यापि स्वशेषत्वावगमेन स्वात्मनःप्रियतमत्वमनुसंधानं वर्तीकर्यादित्यर्थः ॥१९ न
न्वात्मशेषत्वेन सर्वस्य प्रियस्योक्तेरात्मनःप्रियतमत्वमुक्तमनुपपन्नं विकल्पेक्रियमाणे प्रीतेरेव
दुर्निरूपत्वादित्याशयेनाह ॥ प्रीतिस्वरूपंपृच्छति ॥ अथकेयमिति ॥ अयमत्राशयः प्रश्नार्थः यानिजा
त्मनिप्रीतिःश्रूयते इत्ययंप्रीतिःका किंरागरूपा किंवाश्रद्धारूपा उतभक्तिरूपा यदिरागरू

आत्मा०
५

पेति किंरागद्वार्थः स्वतुर्वपिपक्षेषु प्रीतिः सर्वविषयत्वंनसंमतीत्याह ॥ रागइति ॥ रागश्चेद्वध्वादिषु एवंस्र
ग्यागादिषु श्रद्धाचेद्यागादिषु श्रद्धाचेद्यागादिष्वेवस्यान्नवध्वादिषु भक्तिश्चेद्गुर्वादिष्वेवस्यान्नेतरेषु
इच्छाचेदप्राप्तवस्तुविषयैवस्यान्नेतरविषयायश्च अतोनसर्वविषयत्वंप्रीतेरित्यर्थः ॥२१॥ उक्तप्रको
रचतुष्टयातिरिक्तंपक्षमाशंक्योत्तरमाह ॥ तर्हीति ॥ तर्हिप्रीतेरागादिरूपत्वासंभवेसति ॥ सुखस्य

रागोवध्वादिविषये श्रद्धायागादिकर्मणि ॥ भक्तिःस्याद्गुरुदेवादाविच्छात्वप्राप्तवस्तुनि ॥२१॥
तर्ह्यस्तुसात्त्विकीवृत्तिःसुखमात्रानुवर्तिनी ॥ प्राप्तेनष्टेपिसद्भावादिच्छातोव्यतिरिच्यते ॥२२॥

मात्रानुवर्तिनी सुखमेवसुखमात्रं सुखमात्रमात्रमनुसृत्यवर्तत इति सुखमात्रानुवर्तिनी सुखैकगो
चरेत्यर्थः ॥ सात्त्विसत्वगुणपरिणामरूपान्तःकरणवृत्तिः प्रीतिरस्तु ॥ ननुतर्हिसाप्रीतिरिति
छेवेत्याशंक्यपरिहरति ॥ प्राप्तेनेति ॥ इच्छातावदप्राप्तसुखादिमात्रविषया इयंतुसर्वविषयाप्रा
प्तेनष्टेपितस्मिन्विषये विद्यमानत्वादिच्छातः इच्छायाव्यतिरिच्यते भिद्यते ॥२२

इदानींसुखसाधनभूतेष्वन्नादिष्विवात्मन्यपिप्रीतिदर्शनादात्मनोप्यन्नादिवत्सुखसाधनतास्या
दितिशंकते।सुखेति।अन्नपानादयःसुखसाधनतोपाधिनायथाप्रियादृष्टाः।आत्माप्यनुकु
ल्यात्प्रियत्वादन्नादिसमः।अन्नपानादिवत्सुखसाधनंस्यादित्यर्थः।अत्रेदमनुमानंसूचितंविमत
आत्मासुखसाधनंभवितुमर्हतिप्रियत्वादन्नादिवदिति।अन्नादिषुनैगपत्वमुपाधिरित्यनि
प्रायेणपरिहरति।अमुनेति।अत्रलोकेऽमुनासुखसाधनतयाऽनुकूल्येनअनुकूलयितव्यःकस्मा

सुखसाधनतोपाधेरन्नपानादयःप्रियाः।आत्मानुकूल्यादन्नादिसमश्चेदमुनावकः॥२३॥अनु
कूलयितव्यःस्यान्नैकस्मिन्कर्मकर्तृता॥सुखेवैषयिकेप्रीतिमात्रमात्मात्वतिप्रियः॥२४॥

न्नकोपिस्यात्।आत्मानिरतिकस्यनोकुरनावादित्यर्थः॥२३॥ननुस्वस्यैवानुकूलयितव्यःस्यादित्यत
आह।नैकस्मिन्निति।एकस्यैवात्मनोयुगपदुपकार्यत्वमुपकारकत्वंचेतिधर्मद्वयंविरुद्धमित्यर्थः।ननुअ
न्नादिवत्सुखसाधनताभावेपिसुखवत्स्वानुकूलत्वात्प्रेमास्पदत्वंस्यादित्याशंक्यआत्मनोनिरतिशयप्रेमास्पदत्वमेव
मितिसुखेति।वैषयिकेविषयजन्येसुखेप्रीतिमात्रंप्रीतिरेवननिरतिशया।आत्मात्वत्यतिप्रियोनिरतिशय

तत्रोन्नयत्रोपपत्तिमाह।सुखेव्यभिचारेति।सुखेवैषयिकसुखेजायमानाएषाप्रीतिर्व्यभिचरति
कदाचित्सुखान्तरेगच्छति।नतस्मिन्नेवनियताऽवतिष्ठते।आत्मनितुविद्यमानाप्रीतिर्नव्यभिचारिणी
विषयान्तरगामिनीनभवति।अतोनिरतिशयासेत्यर्थः।सुखगोचरायाःप्रीतेर्व्यभिचारंदर्शयति
एकस्मिन्निति॥२५॥आत्मनितुतदभावंदर्शयतिनात्मेति।अयोग्यत्वादित्यर्थः।फलितमाह।तस्मिन्नि
तिहानादिविषयत्वाभावेप्यात्मनस्तृणादिवदुपेक्षाविषयत्वंस्यादितिशंकते।हानेति।हानंपरित्या

सुखेव्यभिचरत्येषापानात्मनिव्यभिचारिणी।एकस्मात्कामदादन्येसुखंवैषयिकंसदा॥२५॥
नात्मात्याज्योनचादेयस्तस्मिन्व्यभिचरेत्कथं।हानादानविहीनेस्मिन्नुपेक्षाचेत्तृणादिवत्
॥२६॥उपेक्षितुःस्वरूपत्वान्नोपेक्ष्यत्वंनिजात्मनः॥

गः।आदानंस्वीकारः।उपेक्षाउदासीनता।२६
आत्मनोहानाद्यविषयत्ववदुपेक्षाविषयत्वमपिनसंभवत्ययोग्यत्वादित्यभिप्रायेणपरिह
रति।उपेक्षितुरिति।उपेक्षितुरुपेक्षाकर्तुर्योनिजोनिजात्मा।विनाशिस्वरूपमात्मनस्वस्वरू
पत्वात्स्वरूपत्वादेवस्वव्यतिरिक्ततृणादिवन्नोपेक्ष्यत्वं।उपेक्षाविषयत्वंनविद्यते।निरोप
नत्वहानविषयः॥

त्वमात्मनो नाल्लीसुक्रमनुपपन्नं द्वेष्यात्मात्मस्तदर्शनादिति तिरं कते। रागेति। यतो मुमूर्षादिरूपतेनामु
आत्मनि द्वेषसंभवात्। तस्य क्रोधादिवदात्मत्वामश्शतियकुष्मते तिद्वेषः॥२४॥ तन्मा गम्यात्मभिन्ने तिरि
कदेहविषयत्वमेवमिति परिहरति। तत्रहीति। तत्र मुमूर्षायोगस्या चितस्य देहस्यात्मत्वा नातिरि
कसतर्हि मितत्वम्॥ह॥ तत्करेवमेति। तत्र देहमागंकारिणो देहातिरिक्तस्यसात्मेनस्यः॥२५॥ ननु
तुत्यक्तुरात्मनं द्वेषस्तौ किमायात मिम तत्राह॥ न त्यक्तरीति॥ त्यक्तो नात्मनस्मात्सत्वमिमानिशायः
रोगक्रोधाभिभूतानां मुमूर्षा वीक्ष्यते क्वचित्॥२३॥ ततो द्वेष्याद्वेषमात्मा त्वात्मेतियदि तन्न हि दिस
कुं योग्यस्य देहस्य नात्मनोऽमिता तत्कृते व सा॥२४॥ न त्यक्तर्यस्ति सद्वेषस्त्याज्ये द्वेषे तु का क्षतिः॥ आ
त्मार्थत्वेन सर्वस्य प्रीतेश्चात्मा ह्यतिप्रियः॥२५॥ मानूदात्मनि द्वेषदेहेतूपलम्भत एवेष्यमात्रं कथमाह सा
त्मेति। सा सदेहगोचरे द्वेषमस्मपि कात्वतिरिक्तात्मनस्मागानावाहि नो ममेति शेषः॥ तदेवं न तत्र रे
पसुकामाय सारमात्मन स्तुकामाय सर्वं प्रियं नवतीसंवाया श्रुतेश्चास्य पर्यालोचनया त्वात्मनः प्रि
यतमत्वं मूर्त्वा युक्तितोपि तद्दृश्यति श्रात्मेति सर्वस्य तु रत्नमाहितस्य तत्साधनजातस्य पतिजाया
देरात्मार्थत्वेन स्वस्मोपकारकत्वेन प्रीतिश्च प्रियत्वादपि आत्मास्य पकार्यः स्वयमतिशयेन प्रियः सिद्धो
हि॥२५॥

एतदेव दृष्टान्तप्रदर्शनेन स्पष्टयति। यथेति। लोके यथा पुत्रमित्रात्पुत्रस्य मित्रभूतात्पुत्र द्वारा प्रीति
विषयाद्यतद्रव्यादेः सकाशात्पुत्रो देवदत्तादिरव्यवधानेन प्रीतिविषयत्वान्नस्मादतिशयेन प्रियो भव
तितस्पितुर्विष्णुमित्रादेस्तथात्मनस्सम्बंधित्वेन प्रीतिविषयात्सर्वस्मात्स्वयमतिशयेन प्रियइत्यर्थः॥
एवमात्मनि स्वतिशयुक्तिस्मामुपपादितां निरतिशयां प्रीतिमनुभवप्रदर्शनेन द्रढयति। मानभूवमिति
अहं मा नभूवमिति। न कोपिममसत्वमस्तु किंतु सर्वदाभूयासं सदा ममसत्त्वमस्तु इत्येवंरूपाश्शाशीः
सिद्धो यथा पुत्रमित्रात्पुत्रः प्रियतरस्तथा॥ मा न भूवमहं किंतु भूयासं सर्वदेत्यसौ॥२६॥ आशीः
सर्वस्य दृष्टेति प्रत्यक्षा प्रीतिरात्मनि॥ इत्यादिभिस्त्रिभिः प्रीतौ सिद्धायामेवमात्मनि॥२७॥ पुत्रभा
र्यादिशेषत्वमात्मनः कैश्चिदीरितं॥ प्रार्थना सर्वप्राणिजातस्यसंबंधिनी दृष्टा सर्वाप्येवमेव प्रा
र्थयत इत्यर्थः॥२०॥ फलितमाह। प्रत्यक्षेति। यतः एवं सर्वैः प्रार्थ्यते अतस्त्वात्मनि निरतिशया प्रीतिः प्र
त्यक्षसिद्धेत्यर्थः॥२१॥ इत्यानुकीर्तनं पुरस्सरं मतांतरं दूषयितुमनुवाष्टते इत्यादिभिरिति। इति शाब्देन
तु नवः परामृश्यते। आदिशब्देन युक्तिश्रुतिरिमादिनिरस्तु नवयुक्तिश्रुतिलक्षणैः त्रिभिः प्रमाणै
रेवसम्बन्धेन प्रकारेणात्मनि॥

श्रीतौ सिद्धायामपि केश्चित् कस्मादित्यातात्पर्यान्निर्देशात्मनः पुत्रनामादिविशेषत्वं पुत्रादीन् प्रतिसम्पोप्य मर्कर्तृन
त्वमीरितमभिहितं। इदं कुतोवगतमित्यत आह। एतदिति। एतद्विवक्षयाएव केश्चिदीर्यत इत्येतदभिव्यक्ती
करणं निघ्रायेणात्मा वै पुत्रनामासीत्यादिकयाश्रुत्या पुत्रस्य मुख्यात्मत्वमीरितमित्यर्थः ॥२२॥ किंच। तत्पुत्रस्य
मुख्यात्मत्वं उपनिषदि ऐतरेयोपनिषत्प्रदेशे स्फुटमभ्यक्तमभिहितमिति विशेषः केन वाक्येनेत्याकांक्षायां त
द्वाक्यमर्थतः पठति। सोस्येति। अस्य पितुः स पुत्र एष इवात्मा यस्मादितो गर्भेनिवर्तते। चकरणे पुरुषे ह

एतद्विवक्षया पुत्रे मुख्यात्मत्वं श्रुतिरितं ॥२३॥ आत्मा वै पुत्रनामेति तत्त्वोपनिषदि स्फुटं। सोस्याय
मात्मा पुण्येभ्यः कर्मभ्यः प्रतिधीयते ॥२४॥ अथास्येतर आत्मायं कृतकृत्यः प्रमीयते॥

हे गर्भत्वेनोक्तः असौ य एवकुमारं जन्मनोग्रे धिभावयति स्त्री ततिरायेन पालनीयतयोक्तः पुत्ररूप
आत्मा पुण्येभ्यः कर्मभ्यः पुण्यकर्मानुष्ठानाय प्रतिधीयते प्रतिनिधित्वेनावस्थाप्यते पित्रेति विशेषः ॥२५॥
अथानन्तरमेवास्य पितुः अयं पुत्रस्तेन परिदृश्यमान इतरः पुत्रादन्यो जरसा ग्रस्तः पितृरूप आत्मायं
कृतकृत्यानुष्ठितकृत्यः जातः सन् प्रमीयते म्रियत इत्यर्थः। उक्तस्यार्थस्य दृढीकरणाय पुत्ररहितस्य प आत्मा
रलोकाभाव प्रदर्शनपरस्य नापुत्रस्य लोकोस्तीति वाक्यस्यार्थमाह॥ ॥ ७

स्यापीति। यतः पुत्रस्य मुख्यमात्मत्वमस्ति अत एवात्मनि स्वस्मिन्सत्यपि स्थिते पितृ पुत्रस्य पुत्ररहि
तस्य पितुर्लोकः परलोको नास्तिहि। इदं पुराणादिषु प्रसिद्धमित्यर्थः ॥२६॥ व्यतिरेकमुखोक्तस्यार्थस्यान्वये
मुखेन प्रतिपादकस्यानुशिष्टं पुत्रं लोक्यमाहुरिति वाक्यस्यार्थमाह। अनुशिष्टमिति मनीषिणः शास्त्रा
र्थाभिज्ञा अनुशिष्टं वस्य मा णोसि ब्रह्मेत्यादिनिमन्त्रैः शिक्षितमेव पुत्रं लोक्यं लोकाय हितं परलोकसाध
नमाहुरित्यर्थः। इहलौकिकसुखस्यापि पुत्रहेतुकत्वप्रतिपादनपरं सोयं मनुष्यलोकः पुत्रेणैव

मत्सप्यात्मनि लोकोस्ति ना पुत्रस्य लाव हि ॥२७॥ अनुशिष्टं पुत्रमेव लोक्यमाहुर्मनीषिणः
।मनुष्यलोको जय्यः स्यात्पुत्रेणैवेतरेण नो ॥२८॥ मुमूर्षुर्मन्त्रयेत्पुत्रं त्वं ब्रह्मेत्यादिमन्त्रकैः ॥ इमा
दिश्रुतयः प्रोक्ताः पुत्रनामादिशेषतां ॥२९॥

जय्यो नान्येन कर्मणेति श्रुतिवाक्यमर्थतः पठति। मनुष्येति। मनुष्यलोकसुखं पुत्रेणैव जय्यं साध्यं
नाद्यं स्यादितरेण कर्मादिसाधनान्तरेण नो नैव न भवति। पुत्ररहितस्य सुखसाधनमपि धनादिकं निर्वेद
जनकं न भवतीति भावः ॥३०॥ अनुशिष्टं पुत्रं लोक्यमित्यत्र पुत्रानुशासन उक्तं इदानीं तस्यावसरं तन्मं
त्रांश्च दर्शयति। मुमूर्षुरिति। आदिशब्देन त्वं यज्ञस्त्वं लोक इति मन्त्रो गृह्यते। एनित्स्मं ब्रह्मेत्यादिनि

मंत्रैर्मुमूर्षुः पितामरणावसरे पुत्रं मंत्रयेत् पुत्रस्यानुशासनं कुर्यादित्यर्थः। उक्तमर्थं निगमयति
इत्यादीति। न केवलमयं श्रुतिसिद्धोऽर्थः॥३६॥ किंतु लोकप्रसिद्धोपीत्याह लौकिकेति। तदेवोपपादयति
स्वस्मिन्निति। तथैव यत्नं कुरुत इति। स्वस्मिन्नित्यादौ एकेनात्रशब्देन त्रापादयो गृह्यन्ते द्वितीयेनत्रादय
॥३७॥ मुख्या इति। यस्मात्स्वप्रयासेनापि पुत्रादिजीवनोपायं संपादयति। ततस्तस्मात्पुत्रादयो

लौकिकात्मत्वपि पुत्रस्य प्राधान्यमनुमन्यते॥ स्वस्मिन्मृतेपि पुत्रादिर्जीवेद्वित्तादिना यथा
३७॥ तथैव यत्नं कुरुते मुख्याः पुत्रादयस्ततः॥ बाढं गौणा भवतात्मानस्तथापि न भवति कस्यचि
त्॥३८॥

मुख्याः प्रधानभूता इत्यर्थः॥ एवं वेदलोकप्रसिद्धिं संदर्श्य तत्पुत्रादिप्राधान्यमंगीक
रोति बाढमिति। तर्ह्यात्मनः शेषित्वोपपादनमाकुप्येदित्याशंक्याह। एतावतेति। एतावता पुत्रादि
कस्यचित्प्राधान्यमस्त्वित्येतावता॥३९॥ नहि प्रतिज्ञामात्रेणार्थसिद्धिरित्याशंक्य यत्र यत्र व्यवहारे यस्य
यस्यात्मत्वं विवक्षते तत्र तस्यात्मनस्तत्र तत्र प्राधान्यप्रदर्शनायोपोद्घाततेनात्मत्रैविध्यमाह। गौ आत्मा. ८
णेति॥

गौणात्मा मिथ्यात्मा मुख्यात्मा चेत्ययमात्मा त्रिधा भवति। तत्र पुत्रादेर्गौणात्मत्वप्रदर्शनाय लोके गौणप्र
योगमुदाहरति। अयं देवदत्तः सिंह इति यद्वद्देवदत्तसिंहयोरैक्यं तद्गौणमौपचारिकं। तत्र हेतुमाह। ए
तयेति ४० दार्ष्टांतिके योजयति। पुत्रादेरिति। अनंतरं मिथ्यात्मानं दर्शयति भेदोस्त्वीति। पंचकोशा
त्मकमयात्मत्वप्रतीतेषु पंचसु कोशेषु साक्षिणः सकाशाद्भिद्यमानोपि भेदो नावभासते अतस्तेषां मिथ्या
त्मत्वमित्यर्थः॥४०॥ मिथ्यात्मत्वे दृष्टांतमाह। स्थाणोरिति। वस्तुतश्चोराद्भिन्नस्य स्थाणोश्चोररूपत्वं

गौणमिथ्यामुख्यभेदैरात्मायं भवति त्रिधा। देवदत्तस्तु सिंहोयमित्यैक्यं गौणमेतयोः॥३९॥ भेद
स्फुटत्वासमानत्वात्पुत्रादेरात्मता तथा। भेदोस्ति पंचकोशेषु साक्षिणो न तु भासते॥४०॥ मिथ्यात्म
तास्य कोशानां स्थाणोश्चोरात्मता यथा। न भाति भेदो नाप्यस्ति साक्षिणोऽप्रतियोगिनः॥४१॥

यथा मिथ्यात्वादित्यर्थः॥ एवं गौणमिथ्यात्मानावुपपाद्येदानीं साक्षिणो मुख्यात्मत्वमुपपादयति। न भाती
ति। साक्षिणः साक्षिरूपस्यात्मनो गौणात्मनः पुत्रादेरिव कस्मादपि भेदो न भाति। मिथ्यात्मनो देहादेरिव भे
दो नास्त्यस्यापि। तत्रोभयत्र हेतुरप्रतियोगिन इति। हेतुगर्भितं विशेषणमप्रतियोगित्वात्॥ यथा पु
त्रादेर्देहादेरपि स्वयं प्रतियोगी विद्यते॥ नैवं स्वस्य वस्तुभूतः कश्चित्प्रतियोग्यस्ति देहादेः सर्वस्यारोपि
तत्वादिति भावः॥४१॥ ॥

ननु भेदाभावेन साक्षिणो गौणमिथ्यात्मत्वे मा भूतां। मुख्यात्मत्वं कुत इत्यत आह। सर्वांतरेति। सर्वस्मा
द्देहपुत्रादेरांतरत्वात्सर्वसाक्षिणः प्रतीचः सर्वांतरत्वेन प्रतीयमानत्वात्तस्यैव साक्षिण एवात्मत्वं मु
ख्यमनौपचारिकमिष्यतेऽभ्युगम्यत इत्यर्थः। अत्र चेदमनुमानं सूचितं। विमतः साक्षी मुख्य आत्मा
भवितुमर्हति सर्वांतरत्वाद्यो मुख्य आत्मा न भवति स सर्वांतरोऽपि न भवति। यथाहंकारादिरिति केव

सर्वांतरत्वात्तस्यैव मुख्यमात्मत्वमिष्यते॥ तस्यैवं व्यवहारे पुत्रेषु यथात्मत्वोचिता। तेषु त
स्यैव शेषित्वं सर्वस्मात्तस्य शेषता॥४२॥ मुमूर्षोर्गृहरक्षादौ गौणात्मैवोपयुज्यते। न मुख्या
त्मा न मिथ्यात्मा पुत्रः शेषी भवत्यतः॥४३॥ व्यतिरेकी भवत्वात्मन्येव धर्मं पुत्रादेः शेषित्वा
भिधाने किमायातमित्यत आह। तस्यैवमिति। एवमात्मत्वे विधेये सति येषु लौकिकवैदिकलक्ष
णेषु पालनपोषणब्रह्मात्मत्वानुसंधानादिषु व्यवहारविशेषेषु यस्य पुत्रादेर्देहादेः साक्षिणो वा
आत्मत्वमुचितं भवति। इति शेषः॥४२॥ तेषु तस्य पुत्रादेर्देहादेः साक्षिणो वा शेषित्वं प्रधानत्वं अन्य आत्मा· ८
स्मात्तद्व्यतिरिक्तस्य शेषता उपसर्जनत्वं भवतीति शेषः॥४२॥ एतदेव प्रपंचयति। मुमूर्षोरित्यादिना
श्लोकपंचकेन। मुमूर्षोरिति। गृहरक्षादौ कर्मवि

६

शेषे गौणात्मैव पुत्रनामादिरूप एवोपयुज्यत उपयुक्तो भवति। उत्तरत्र जिजीविषुत्वादित्यर्थः॥
मुख्यात्मा साक्षी नोपयुज्यते अविकारित्वात्तत्रापि मिथ्यात्मा न स्वमरणोन्मुखत्वादित्यर्थः। फलित
माह। पुत्र इति। स्पष्टं॥४३॥ उक्ते गृहरक्षादिव्यवहारेऽसत्यपि ममाभिसुखादिस्वीकारे दृष्टांतमाह। अ
ध्येता वह्निरिति। अध्येता वह्निरित्यस्मिन्प्रयोगे स्वरूपेण विद्यमानोऽप्यनभिप्रायार्थत्वेन न गृह्यते

अध्येता वह्निरित्यत्र सन्नप्यग्निर्न गृह्यते। अयोग्यत्वेन योग्यत्वाद्बटुरेवात्र गृह्यते॥४४॥
कृशोऽहं पुष्टिमाप्स्यामीत्यादौ देहात्मतोचिता। न पुत्रे विनियुक्ते तु पुष्टिर्देहे तु भक्षणे॥४५॥

तस्य केवलत्वा। किंत्वध्येतृसत्त्वयोग्यो बटुर्माणवक एवात्रास्मिन्प्रयोगेऽभिप्रायार्थत्वेन गृह्यते
योग्यत्वादित्यर्थः॥४४॥ एवं गौणात्मप्राधान्यस्थलमुदाहृत्य मिथ्यात्मप्राधान्यस्थलमुदाहरति। कृशो
हमिति। अहं कृशो मांसक्षतो भक्षणादिना पुष्टिमापादयिष्यामीत्यादौ लोकव्यवहारेऽत्र भक्षणे
योग्यस्य देहस्यैवात्मत्वं ग्रहीतुमुचितं। अतः मर्त्यलोकव्यवहारप्रदर्शनेन दर्शयति। न पुत्रमिति
॥४५॥

किंचातप्स्येति। यदा तु तपः कृत्वा स्वर्गं संपादयिष्यामीत्यादिव्यवहारं करोति तदा कर्तृत्वाश्रयत्वा
त्व विज्ञानमयस्यैवात्मत्वमुचितं न देहादेरित्यर्थः॥ तदेवोपपादयति॥ अनपेक्ष्येति॥ यतो न देह
स्यात्मत्वमुचितं ततो देहत्यागपरित्यागपूर्वकं कर्तृरूपकारकं कृच्छ्रचान्द्रायणादि किंचरन्नित्यर्थः
४८॥ किंच॥ मोक्ष्येहमिति॥ यदा पुमान् श्रवणादीन् संपाद्य मुक्तिं प्राप्स्यामीति मतिं करोति तदा गुरुः

तप्स्यास्वर्गमिष्यामीत्यादौ कर्त्रात्मतोचिता॥ अनपेक्ष्य वपुर्मार्गं चरेत्कृच्छ्रादिकं ततः॥४८॥
मोक्ष्येहमिति युक्तं चिदात्मत्वं तदा पुमान्॥ नह्येति गुरुमाचार्यमानतुर्किंचिच्चिकीर्षति॥४९॥
विप्रक्षत्रादयोप्येवं हृदस्तीति सर्वादिषु व्यवस्थिता स्त्याग्यगौणमुख्यमिथ्यात्मतोचितं॥

गुरुशास्त्राचार्योपदेशवाक्यार्थविचारजन्यापरोक्षज्ञानेन नाहं कर्त्रात्मा सच्चिदानन्दब्रह्माह
मस्मीति चिदात्मानमवगच्छति तस्य चिदात्मत्वमेवोचितं न तु तत्र कर्त्राद्यात्मत्वमित्यर्थः॥४९॥उ
दाहृतानां त्रिविधानामात्मनां व्यवहारविशेषेष्वनध्यासावधारणे दृष्टान्तमाह॥ विप्रेति॥ यथा ब्रा
ह्मणो बृहस्पतिसवेन यजेतेत्यत्र ब्राह्मणस्यैवाधिकारो न क्षत्रियवैश्ययोः राजा राजसूयेनेत्यत्र १०
राज्ञ एवाधिकारो न ब्राह्मणः॥

वैश्ययोः॥ वैश्यो वैश्यस्तोमेन यजेतेत्यत्र वैश्यस्यैवाधिकारो न त्रयोः॥ एवं गौणमिथ्यामुख्यानेदानामा
त्मनां यथायोगं स्वोचितव्यवहारेषु प्राधान्यमिति भावः॥४७॥ फलितमाह॥ तत्र तत्रेति॥ यस्मिन्न
स्मिन्व्यवहारे यो यश्चात्मा तदुचितो भवति। तत्र तत्र तस्मिंस्तस्मिन्व्यवहारे तदुचितप्रयोगिता याव
भानं भूतश्चात्मन्येव प्रीतिरतिशायिनी अतिशायवतीति ततो षेतस्यात्मनो शेषभूतेः नान्यनिष्ठा

तत्र तत्रोचिते प्रीतिरात्मन्येवातिशायिनी॥ अनात्मनि तु तच्छेषे प्रीतिरन्यत्र नोभयं॥
४९॥ उपेक्ष्यं द्वेष्यमित्यन्यत्तद्वयं मार्गतृणादिकं उपेक्ष्यं माध्यस्थ्यपादि द्वेष्यं एवं चतुर्विधं
५०॥

त्मव्यतिरिक्ते वस्तुनि प्रीतिः प्रीतिमात्रं न निरूप्यायं प्रमेयेत्यर्थः अन्यत्र आत्मतच्छेषाभ्यामन्यस्मिन्व
स्तुनि तो न यमुभयविधमपि प्रेम नास्तीत्यर्थः॥ ४९॥ अन्यत्र नोभयमित्यत्रानिर्दिष्टमान्यत्राप्यर्थस्य
चातुर्विध्यमाह॥ उपेक्ष्यमिति॥ अस्मदन्यदृश्यमानं वस्तु पेक्षाविषयः द्वेष्यं द्वेषविषयश्चेति द्विधा
द्विप्रकारं भवति तदुभयमुदाहरति॥ मार्गेति॥ मार्गतिं तृणजोष्ठादिकमुपेक्ष्यं॥ व्याघ्रोपद्रवहेतुभू
व्याघ्रादिकं तद्द्वेष्यमित्यर्थः॥ फलितमाह॥ एवमिति॥ ५०॥ ॥

चतुर्विधमेव दर्शयति आत्मेति। नन्वात्मादीनां चतुर्णामपि प्रियतमत्वादिकं किं नियतं नेत्याह चतु
रिति। अयमेव प्रियतमः अयमेव प्रियः इदमेवोपेक्ष्यं इदमेव द्वेष्यं नान्यदिति नियमो नास्तीत्यर्थः
किं तर्हीत्यत आह। किं त्विति। तस्मात्तस्मात्कार्यविशेषादुपकारादिरूपात्तथा तथा प्रिया प्रियादिरू
पत्वेनेत्यर्थः ॥५१॥ सर्वत्रानियमं योजनाय प्रसिद्धं द्वेष्यमादौ तदन्नादं दर्शयति। स्यादिति। यदा व्याघ्रः स्वे
नहननाय संमुखमागच्छति तदा द्वेष्यो भवति स एव पराङ्मुखो गच्छंश्चेदुपेक्ष्यो भवति स एव येदिला
आत्मा शेषस्तु पेक्ष्यं च द्वेष्यं चेति चतुर्ष्वपि ॥ न नियमः किं तु तत्कार्याद्व्याघ्रस्तु यानतया ॥५१॥ सा
व्याघ्रः संमुखो द्वेष्यो ह्युपेक्ष्यस्तु पराङ्मुखः। लालनादनुकूलश्चेद्विनोदाय प्रियो भवेत् ॥५२॥ ... नि
यमो मा नूक्तलक्षणं तु भवस्थितिः आनुकूल्यप्रातिकूल्ये द्वयाभाव इत्युक्तलक्षणं ॥५३॥
लनात्स्वानुकूलो भवति तदा विनोदायेति विनोदसाधनं भवतीति शेषः तदा स्वस्योपकारकत्वेन प्रियत्वं
भजत इत्यभिप्रायः ॥५२॥ ननु केकस्यैव वस्तुनः प्रियत्वादिधर्मत्रयांगीकारे व्यवहारव्यवस्था न स्यादित्याशं
क्याह। व्यक्तीनामिति। व्यक्तीनां नियमाभावेऽपि लक्षणवशाद्व्यवस्था न विरुध्यतीत्यर्थः किं तल्लक्षणमित्याकांक्षा
यां तल्लक्षणमाह। आनुकूल्यमिति। आनुकूल्यं प्रियस्य लक्षणं प्रातिकूल्यं द्वेष्यस्य लक्ष (आत्मा. १२)
णमुपेक्ष्यस्यानुकूल्यप्रातिकूल्यरूपद्वयाभावश्च लक्षणमित्यर्थः ॥५३॥

एतावता ग्रंथसंदर्भेणोपपादितमर्थं बुद्धिसौकर्याय संक्षिप्य कथयति। आत्मेति। आत्मा परमानंद
प्रेयस्तत्त्वात्प्रियः शेषः स्वोपसर्जनभूतः पदार्थः प्रियस्तदन्ययोस्तु मिमात्मनस्तद्व्यापारान्ययोरुपा
धिगतत्वादिरूपयोर्द्वेष्योपेक्ष्ययोर्यथाक्रमं भवत इति। एवं चातुर्विध्येन लोको व्यवस्थितः अवस्था
सः तत्प्रकारचतुष्टयातिरिक्तं न किंचिद्विद्यत इत्यभिप्रायः अयमर्थः अस्मिन्मते पीत्याह। याज्ञव
आत्मा प्रेयान्प्रियः शेषो द्वेष्योपेक्ष्ये तदन्ययोः। इति व्यवस्थितो लोके याज्ञवल्क्यमतं च तत् ॥५४॥
अन्यत्रापि श्रुतिः प्राह पुत्राद्वित्तात्तथान्यतः। सर्वस्मादान्तरं तत्त्वं तदेतत्प्रेय इष्यतां ॥५५॥

यक्येति। आत्मादीनां प्रियतमत्वादिकं यत्तद्याज्ञवल्क्यमतं च याज्ञवल्क्यस्यापि संमतमित्यर्थः ॥५४॥
न केवलं मैत्रेयीब्राह्मण एवात्मनः प्रियतमत्वमुक्तं। किं तु पुरुषविधब्राह्मणेऽपीत्यभिप्रायेण तद्वा
क्यार्थं संगृह्णाति। अन्यत्रापीति। तदेतत्प्रेयः पुत्रात्प्रेयो वित्तात्प्रेयोऽन्यस्मात्सर्वस्मादंतरतरं यदयमा
त्मेति अनेन वाक्येन पुत्रवित्तादेः सर्वस्मादंतरस्यात्मन एव प्रियतमत्वमीरितमित्यर्थः ॥५५॥ ॥

ण

नवत्वेवंश्रुतावनिधानं प्रकृते किमायातमित्यत आह ॥ श्रोत्रादीति ॥ अस्यार्थः पर्यालोचनरू
पस्य विचारस्य दृष्टत्वात् साक्षिण एव सुखरूपत्वं नेतरस्य पुत्रादेरित्यर्थः ॥ विचारदृष्टस्य साक्षिणं सहितस्य विचारस्य स्व
रूपमाह ॥ कोशानिति ॥ अन्नमयादीन्पंचकोशांस्त्रीणि शरीरीयस्य सूक्ष्मप्रकारेणात्मनः पृथक्कृत्वा
तःस्थितस्यात्मनोऽनुभवो विचारेणेत्यर्थः ॥ ५५ ॥ अंतःस्थितस्य वस्तुनो दर्शनप्रकारमेवाह ॥ जागरे

श्रोत्रादिविचारदृष्ट्यायं साक्षी स्वात्मा न चेतरः ॥ कोशान्पंच विविच्यांतर्वस्तुदृष्टिर्विचारणा ॥
५६ ॥ जागरस्वप्नसुषुप्तीनामागमापायभासनं ॥ यतो भवत्यसावात्मा स्वप्रकाशश्चिदात्मकः ॥
५७ ॥ शेषाः प्राणादिवित्तांता आसन्नास्तारतम्यतः प्रीतिस्तथा तारतम्यात्तेषु सर्वेषु वीक्ष्य

ते ॥ ५८ ॥ सादिनां जाग्रदाद्यवस्थानां मध्ये जाग्रत एवावस्थागमनस्य पूर्वापूर्वावस्थाया निवृत्तेश्चावभास
कत्वेन नित्यश्चैतन्यस्वरूपः साक्षिणो भवति सः स्वप्रकाशश्चिद्रूपश्चात्मेत्यर्थः ॥ ५७ ॥ संप्रति श्लोकमस्यार्थं प्रपंच
यति ॥ शेषा इति ॥ साक्षिणो व्यतिरिक्ताः प्राणादिवित्तांताः पदार्थास्तारतम्येनात्मन आसन्नाः समीपव
र्तिनो भवंति तत्रोपपत्तिमाह ॥ प्रीतिरिति ॥ यथा तारतम्येनांतरत्वं तद्वद्देहेषु प्राणादिषु तारतम्येन प्रीतिर्दृश्यते ॥

प० द० टी० प० १२

प्रीतेस्तारतम्येनानुभवमेव विशदयति ॥ वित्तादिति ॥ पिंडोऽन्नमयो देहः स्वयं नायं सर्वैः प्राणिभि
र्वित्तादिविपत्परिहाराय वित्तं त्यज्यते स्वदेहरक्षणाय कोशविलुप्तादिरर्पिदीयते ॥ इंद्रियनाशपरि
हाराय ताडनादिभिर्देहपीडाप्यंगीक्रियते ॥ मरणप्रसक्तौ तत्परिहाराय इंद्रियकेवल्यमप्यंगीक्रि
यते अत एवोत्तरोत्तरमतिशयेन प्रियत्वं सर्वानुभवसिद्धं ॥ आत्मतत्त्वं तु निरतिशयप्रेमास्पदत्वे वि

वित्तात्पुत्रः प्रियः पुत्रात्पिंडः पिंडात्तथेंद्रियं ॥ इंद्रियाच्च प्रियः प्राणः प्राणादात्मा परः प्रि
यः ॥ ५९ ॥ एवं स्थिते विवादोऽत्र प्रतिबुद्धविमूढयोः ॥ श्रुत्योदाहारि तत्रात्मा प्रेयानित्येव निर्णयः
॥ ६० ॥ साक्ष्येव दृश्यादन्यस्मात्प्रेयानित्याह तत्त्ववित् ॥ प्रेयान्पुत्रादिरेवेमं भोक्तुं साक्षीति मूढधीः

॥ ६१ ॥ इदमनुभवसिद्धमिति ॥ ५८ ॥ एवमात्मनः प्रियतमत्वे प्रमाणसिद्धेऽपि शास्त्रज्ञानिनो विप्रतिप
त्तिनिरसनाय श्रुत्यपि तद्विप्रतिपत्तिं दर्शितमित्याह ॥ एवमिति ॥ तत्र निर्णयमाह ॥ तत्रात्मेति ॥ आत्म
नः प्रियतमत्वं प्रोक्तं पादित्वादित्यर्थः ॥ ६० ॥ तामेव वादिनं विप्रतिपत्तिमाह ॥ साक्ष्येवेति ॥ ६१ ॥ दृ

आत्मातिरिक्तस्य प्रियत्ववादिनो विजयोत्तराभिधानायतनमेवादिनं विनस्य कथयति। आत्मनेति
उत्तराभिधानप्रकारमाह। तस्योत्तरमिति। यतोः शिष्यप्रतिवादिनोः संबंधिनस्तस्य वचनस्योत्त
रं वचः प्रस्तुतरूपं वाक्येन क्रमेण बोधकं यत्पो बोधकशापं सकुर्यादित्यर्थः॥ १९॥ अनयोः प्रतिवचन
स्य प्रदानरूपं तयोरात्मनात्मनः प्रियं ब्रुवाणं ब्रूयात्प्रियं रोत्स्यतीति समनेतरः केतिवाक्यमर्थयति।
पवति। प्रियमिति। तत्त्ववित् शिष्यप्रतिवादिनो कुर्णोप्यपि प्रतिहे शिष्य हे प्रतिवादिन् प्रियं त्वदन्निये

आत्मनोऽन्यप्रियं ब्रूते शिष्यश्च प्रतिवाद्यपि तस्योत्तरं वचो बोधशापौ कुर्यान्नियोः क्रमात्
हे। प्रियं त्वां रोत्स्यतीत्येवं उत्तरं वक्ति तत्त्ववित्॥ स्वोक्तप्रियस्य दुष्टत्वं शिष्यो वेत्ति विवे
कतः॥ १९॥ तं पुत्रादिरूपं स्वनाशेन त्वां शिष्यं प्रतिवादिनं वा रोत्स्यति रोदयिष्यतीत्येवमुक्तेन
प्रकारेणोत्तरं प्रतिवचनं वक्ति ब्रवीमि इदमेकमेव वचनं शिष्यप्रतिवादिनोरुनयोः कयमुपेर
जात्यमित्यत्रांक्य शिष्यप्रश्नोत्तरत्वमुपदेशरूपत्वं तावद्योनयति स्वोक्तप्रियस्य सा दिन पक्षान्तेन
महर्निशामित्यंतेन सार्धश्लोकचतुष्टयेन। शिष्यस्योक्तप्रियस्य स्वेनाभिहितस्य पुत्रादिरूपस्य प्रीति १३
विषयस्य विवेकतः क्षमाणदोषविचारेण दुष्टत्वं वेत्ति अवगच्छति॥ २०॥

दोषविचारप्रकारमेव दर्शयति। अलभ्यमानेति। एवं पुत्रगतदोषसंकीर्तनं द्वारादिसर्वविषयहेयो
पलक्षणार्थं। एवं विविच्येति। एवमुक्तेन प्रकारेण पुत्रादौ विषयजाते विविच्य विद्यमानान्दोषान्विनश्
यतात्स्मिन्नीतिपरिस्यज्य निजात्मनि पूर्णस्वरूपे परमात्मनि आपरमां निरतिशयां प्रीतिं निश्चित्य तं प्रत्य
गात्मानमहर्निशं सर्वदा वीक्षते अनुसंधत्त इत्यर्थः॥ २१॥ प्रियं त्वां रोत्स्यतीत्यस्यैव वाक्यस्य प्रतिवादिनं

अलभ्यमानस्तनयः पितरौ क्लेशयेच्चिरं। लब्धोऽपि गर्भपातेन प्रसवेन च बाधते॥ २२॥ जातस्य
ग्रहरोगादि कुमारस्य च मूर्खता। उपनीतेऽप्यविद्यत्वमनुद्वाहश्च पंडिते॥ २३॥ यूनश्च परदारादि
दारिद्र्यं च कुटुंबिनः। पित्रोर्दुःखस्य नास्त्यन्तो धनी चेन्म्रियते तदा॥ २४॥ एवं विविच्य पुत्रादौ प्रीतिं त्य
क्त्वा निजात्मनि। निश्चित्य परमां प्रीतिं वीक्षते तमहर्निशं॥ २५॥ आयद्वा द्वत्ता विद्विपादपिपततम
मुंचतः॥ वादिनो नरकः प्रोक्तो दोषश्च बहुयोनिषु॥ २६॥

प्रतिवचनपरत्वं प्रकटयति। आयदिति। आग्रहादिकं पुत्रादिप्रियत्वं सर्वथा न त्यजामीत्येवं रूपाग्रह
सद्विद्वेषादिनेनोक्तं विघटयिष्यामीत्येवं रूपाच्च पक्षपुत्रादिनामैव प्रियत्वाभिधानरूपपक्षपरित्यजतः
प्रतिवादिनो नरकप्राप्तिः सर्वथा बहुयोनिषु नरतिर्यगादियोनिषु जन्ममृत्युदोषः पुनर्नार्यादि विष्ठावि
[illegible] प्रियं त्वां रोत्स्यतीति वदतो [illegible] दोषः

ननु तानि नोक्तस्ये । कस्येदं वाक्यस्य शिष्यं प्रत्युपदेशरूपत्वं वादिनं प्रतिशापरूपत्वं चेति विरुद्धं रूपद्वयं
कथं घटत इत्याशंक्योत्तरभूतां तुरीश्वररूपत्वात्तस्माच्छिक्षायानुसारेणोक्तमयं न विरुध्यतीति मत्वा तदुप
पादकस्येश्वरोहं तथैव स्यादिति समनंतरवाक्यस्य तात्पर्यमाह ब्रह्मविदिति । यतो ब्रह्मवित्स्वस्य
ब्रह्मत्वानुभवादीश्वरत्वमस्त्यतस्तेन यं यं शिष्यादि प्रति यद्यदिष्टमनिष्टं वानीश्याय तेन तन्न शिष्य
प्रतिवादिनोरुक्तस्य शोभिनो यः शिष्यः यश्च प्रतिवादी तयोस्तत्तथैव स्यान्न इष्टमनिष्टं वा व्यर्थं न वेदितव्यं

ब्रह्मविद्ब्रह्मरूपत्वादीश्वरस्तेन वर्णितं । यद्यत्तत्तथैव स्याच्छिष्यप्रतिवादिनोः ॥९॥ यस्तु सा
क्षिणमात्मानमेवं ते प्रियमुत्तमं ॥ तस्य प्रेयानमेवात्मा न नश्यति कदाचन ॥१०॥ इत्युक्ति

रेकसुखे नोक्तस्यार्थमन्वयमुखेन प्रतिपादकमात्मानमेव प्रियमुपासीत स य आत्मानमेव प्रि
यमुपास्ते न हास्य प्रियं प्रमायुकं भवतीति समनंतरवाक्यमर्थतः पठति यस्त्विति । तत्र साक्षिण
मेवेक्षणस्य द्योतनार्थः अनात्मत्वाप्रियत्ववादिनो मा यः शिष्यः आत्मानमेवोत्तमप्रियं निरति
शयप्रेमगोचरमेवेत्येतमदानुस्मरति तस्य शिष्यादेः प्रेयान्प्रियतमत्वेनाभिमतोऽयमात्मा प्र
तिवाद्यभिमतप्रियमिव न कदाचिदपि नश्यति किंतु सदानंदरूपः सन्नवभासत इत्यर्थः ॥१०॥ १४

इत्थमात्मनः परप्रेमास्पदत्वहेतुं प्रसाध्येदानीं फलितमाह । परप्रेमास्पदत्वेनेति । अत्रायं प्रयोगः । आत्मा
परमानंदरूपः । निरतिशयप्रेमविषयत्वात् । यः परानंदरूपो न भवति स निरतिशयप्रेमविषयोऽपि
न भवति । यथा घटादिरिति केवलव्यतिरेकी । परप्रेमास्पदत्वहेतोरात्मनः परमानंदरूपतासाधनसामर्थ्य
द्योतनाय प्रीतिवृद्धौ सुखवृद्धिं श्रुत्युदाहरति सुखवृद्धिरिति । यतः सार्वभौमादिहिरण्यगर्भांतेषु पदविशेषेषु
यत्र यत्र प्रीतिवृद्धिस्तत्र तत्र सुखस्याभिवृद्धिरस्तीति तैत्तिरीयबृहदारण्यकश्रुत्योरभिहितमतः प्रीतेर्निर

परप्रेमास्पदत्वेन परमानंदरूपता ॥ सुखवृद्धिः प्रीतिवृद्धौ सार्वभौमादिषु श्रुता ॥११॥ चैतन्यव
त्सुखं चास्य स्वभावश्चेच्चिदात्मनः । धीवृत्तिष्वनुवर्त्तेत सर्वास्वपि चितिर्यथा ॥१२॥ मैवं रूपप्रकाशा
त्मादीपत्वस्य घनागृहे व्याप्नोति नोष्णता तद्वत्तेरेवानुवर्त्तनं ॥१३॥ तिशयत्वे सति आनंदस्या

पि निरतिशयत्वमवगंतुं शक्यत इति भावः ॥११॥ नन्वात्मनः परमानंदरूपत्वमनुपपन्नं तथात्वे चैतन्य
स्येव तत्स्वरूपत्वस्य सर्वास्वपि धीवृत्तिषु प्रसज्येतेति शंकते चैतन्येति ॥१२॥ चिदानंदयोरुभयोरप्यात्मस्व
रूपत्वेऽपि चित्तवृत्तिषु चित एवानुवृत्तिर्नानंदस्येति दृष्टांतावष्टंभेन परिहरति मैवमिति । यथा प्रकाशात्म
कस्य दीपस्य प्रकाश एव गृहादावनुगच्छति नोष्णता एवं चैतन्यस्यैवानुवृत्तिर्नानंदस्येत्यर्थः ॥१३॥

ननु चिदानंदयोरभेदे चिदभिव्यंजकधीवृत्तावेवानंदाभिव्यक्तिरपि स्यादित्याशंक्य तथा नियमाभावे दृष्टां
तमाह ॥ गंधेति ॥ यथैकद्रव्यवृत्तीनां गंधादीनां चतुर्णां मध्ये घ्राणादिनैकेंद्रियेण गंधादिरेक एव गृ
ह्यते नेतरः। तथा चिदानंदयोर्मध्ये चिदेवावभासत इत्यर्थः ॥१४॥ दृष्टांतदार्ष्टांतिकयोर्वैषम्यं शंक
ते चिदानंदाविति। विलक्षणा भिन्ना इत्यर्थः। उक्तं वैलक्षण्यं परिहरति दार्ष्टांतिके चिदानंदयोरभेदः। किं

गंधरूपरसस्पर्शेष्वपि सत्सु यथा पृथक् ॥ एकैकेनैक एवार्थो गृह्यते नेतरस्तथा ॥१४॥ चिदानंदौ
नैव भिन्नौ गंधाद्यास्तु विलक्षणाः ॥ इति चेत्तद्वदन्योऽपि माऽस्ति एष मन्यतां वद ॥१५॥ आद्ये गंधादयो
प्येवमभिन्ना अनुभववत्तिनः ॥ अतद्भेदेन तद्भेदे हि भिन्नतया भिदा ॥१६॥ स्वाभाविकउत औपाधि

क इति विकल्पयति। तद्भेदोपीति। तदन्ये द्रव्ययोश्चिदानंदयोरभेदः। एकात्मस्वरूपे वा अन्य
वत्तदुपाधिभूतासु वृत्तिषु वेत्यर्थः ॥१५॥ प्रथमे पक्षे दृष्टांतदार्ष्टांतिकयोः साम्यमाह आद्ये गंधाद
य इति। आद्ये चिदानंदयोः स्वाभाविके भेदाभावपक्षे तु अनुभववर्तिनो गंधादयोपि एवं चिदानंदवदेवाभिन्नाः प
रस्परं भेदरहिताः इतरपरिहारे एकस्मान्न नु भवाकुलत्वादिति भावः। द्वितीये पक्षेपि साम्यमाह अन्त्येति सू
क्ष्माणां गंधादिग्राहकाणां घ्राणादींद्रियाणां भेदेन तद्भेदे तेषां गंधादीनां भेदमुपगमेत तद्वदेव हृत्तिभेदाच्चिदानं १५
दाभिभक्तिः

तूनां राजससात्विकवृत्तीनां भेदात्तयोश्चिदानंदयोर्भिदा भेदो भविष्यतीत्यर्थः ॥१३॥ ननु तर्हि चिदा
नंदयोरैक्यं कुत्रोपलभ्यत इत्याशंक्याह सत्त्ववृत्ताविति शुभकर्मोपस्थापितायां सत्त्वगुणपरिणामरूपा
यां बुद्धिवृत्तौ चित्सुखे चिदानंदयोरैक्यं भासत इति शेषः तत्रोपपत्तिमाह। तद्वृत्तेरिति। कुत्र तर्हि भेदे
न भासत इत्यत आह रजोवृत्तेरिति ११ विद्यमानस्यापि सुखांशस्य तिरस्कारे दृष्टांतमाह तिंतिणी

सत्त्ववृत्तौ चित्सुखैक्यं तद्वृत्तेर्निर्मलत्वतः ॥ रजोवृत्तेस्तु मालिन्यात्सुखांशोऽत्र तिरस्कृतः ॥
११ ॥ तिंतिणीफलमत्यम्लं लवणेन युतं यदा ॥ तदाम्लस्य तिरस्कारादीषदम्लं यथा तथा
॥१७॥ ननु प्रियतमत्वेन परमानंदतात्मनि ॥ विवेकुं शक्यतामेवं विना योगेन किं भवेत् ॥
॥१८॥

फलमिति। यथा तिंतिणीफलं लवणयोगादम्लत्वं तिरोहितं तद्वद्गोवृत्त्याचानंदस्य तिरो
भाव इत्यर्थः ॥१७॥ गूढाभिसंधिः शंकते। नन्विति। ननूक्तेन प्रकारेणात्मनः परमानंदरूपत्वं पर
प्रेमास्पदत्वहेतुना गौणमिथ्यात्मरूपेभ्यः प्रियोपेक्ष्यद्वेष्येभ्यो विवेक्तुं विविच्य ज्ञातुं शक्य
तां नाम तथापि नायं विवेको मुक्तिसाधनं स्यात् परोक्षज्ञानत्वात् अतो मुक्तिहेतोर्योगस्यानुष्ठानादिति गूढा
भिसंधिः ॥१८॥

गूढाभिसंधिरेवोत्तरमाह ॥ यद्योगेनेति ॥ यथा योगस्य परोक्षज्ञानहेतुत्वमस्ति । एवं विवेकस्यापि अस्
त्यपि गूढाभिसंधिः ॥ इदानीं चोद्यपरिहारयोरुभयोरपि संक्षिप्यार्थं कटयति । ज्ञानेति ॥ यथा परोक्षज्ञान
साधनत्वेन योगो निर्दिष्टः । पूर्वस्मिन्नध्याये एवमस्मिन्नध्याये निर्दिष्टेन योगेनाध्यात्मविवेकद्वारा की
दृशं च कविवेकेनापि ज्ञानं संपद्यत । वेत्यर्थः ॥ ४ ॥ तत्र किं प्रमाणमित्याशंक्याह ॥ यत्सांख्यैरिति । सां

ख्यैर्योगेन तदेवेति वदामः ज्ञानसिद्धये ॥ योगः प्रोक्तो विवेकेन ज्ञानं किं नोपजायते ॥ ५ ॥ यत्
सांख्यैः प्राप्यते स्थानं तद्योगैरपि गम्यते । इति स्मृतं फलैकत्वं योगिनां च विवेकिनाम् ॥ ६ ॥ असा
ध्यः कस्यचिद्योगः कस्यचिज्ज्ञाननिश्चयः । इत्थं विचार्य मार्गौ द्वौ जगाद परमेश्वरः ॥ ७ ॥

सांख्यैरात्मानात्मविवेकिभिर्यत्स्थानं मोक्षरूपं प्राप्यते गम्यते । तद्योगैर्योगिभिरपि गम्यते प्राप्यत इति व
चनेन योगिनां विवेकिनां च फलैकत्वं ज्ञानद्वारा मोक्षलक्षणस्य फलस्यैकत्वमुक्तमित्यर्थः ॥ ८ ॥ ननु विवे
कयोगयोरेकमेव चेत्फलं तर्ह्युभयोरन्यतरस्यैव युक्तं शास्त्रे प्रतिपादनं नोभयोरित्याशंक्याधिकारिवैचि ज्ञाना
त्र्यादुभयप्रतिपादनमित्यभिप्रायेणाह ॥ असाध्य इति ॥ ९ ॥ १६

नन्वसंतायासमसाध्यस्य । योगस्य निरायाससुलभाद्विवेकादतिशयो वक्तव्यस्तमाशंक्य सोतिशय
: किमपरोक्षज्ञानजनकत्वादुच्यते उत रागद्वेषनिवृत्तिहेतुत्वादथवा वेगानुपलब्धिकारणत्वादिति
विकल्प्य प्रथमे पक्षे फलसाम्यमित्याह ॥ योगे कोतिशय इति ॥ द्वयोर्विवेकयोगयोरुभयोरपि ज्ञा
नलक्षणं फलं सममुक्तं यत्सांख्यैरित्यादिना अतस्तत्र योगे कोतिशयः न कोपीत्यर्थः ॥ द्वितीयं

योगे कोतिशयस्तत्र ज्ञानमुक्तं समं द्वयोः ॥ रागद्वेषाद्यभावश्च तुल्यो योगिविवेकिनोः ॥ १० ॥
न प्रीतिर्विषयेष्वस्ति द्वेष्यानात्मेति जानतः ॥ कुतो रागः कुतो द्वेषः प्रातिकूल्यमपश्यतः ॥

सपक्षमाह ॥ रागद्वेषादीति ॥ ११ ॥ विवेकिनो रागाद्यभावमुपपादयति ॥ न प्रीतिरिति ॥ आत्माद्वि
तीयमिति जानतः सुखरूपस्यानात्मवृद्धिविषयेषु प्रीतिरस्ति । अतो न तेषु रागो जायते । रागहेतोरानु
कूल्यज्ञानस्याभावान्नापि द्वेषः । न द्वेषो प्रातिकूल्यज्ञानस्याप्यभावादित्यर्थः ॥ १२ ॥

ननु विवेकिनो व्यवहारदशायां देहाद्युपद्रवकारिषु द्वेषो दृश्यत इत्याशंक्य तदा योगी विवेकिनोः समतु
ल्यमिति परिहरति । देहादेरिति । प्रतिकूलेषु व्याघ्रवृश्चिकादिषु द्वेषकर्तुस्तदा योगित्वमेव नास्त्युपगम्यते
चेत्तर्हि तादृशस्य विवेकित्वमपि नाभ्युपगच्छाम इत्याह द्वेषमिति । नाहमयोगी द्वेषकर्त्ता चेदविवेक्यपि वि
वेकवानपि न भवतीत्यर्थः ॥ ८३ ॥ ननु विवेकिनो द्वैतदर्शनमस्ति योगिनस्तु तन्नास्तीति वैषम्ये विकल्प्य
योगिनः विशेषोऽनभिज्ञतीत्याशंक्य विवेकिनस्तद्द्वैतदर्शनं किं व्यवहारदशायामुच्यते उत अन्यदेति

देहादेः प्रतिकूलेषु द्वेषस्तुल्यो द्वयोरपि ॥ द्वेषं कुर्वन्नयोगी चेदविवेक्यपि तादृशः ॥ ८४ ॥ द्वै
तस्य प्रतिभानं तु व्यवहारे द्वयोः समं ॥ समाधौ नेति चेत्तद्वदद्वैतत्वविवेकिनः ॥ ८५ ॥ ॥

विकल्प्याद्ये तद्योगिनो समानमित्याह ॥ द्वैतस्येति ॥ द्वितीयमाशंक्य समाधाविति । योगिनः समा
धिकाले द्वैतदर्शनं नास्तीत्युच्यते चेदिस्य धाहारः । तर्हि विवेकिनोपि विवेकदशायां द्वैतादर्शनं
तुल्यमिति परिहरति । तदुपादयंति योगिनः समाधिदशायामिवाद्वैतत्वविवेकिनो द्वैतं तत्त्वमिति
श्रुतियुक्तिभ्यां विवेचनं कुर्वतोपि तस्मिन्काले द्वैतदर्शनं नास्तीत्यर्थः ॥ ८५ ॥ ॥

आत्मा॰ १३

पंचदशी १८

कथं तदनात्मवस्त्वाशंक्यपरितने ध्यायेत्तदुपपादयतिप्यतइत्याह ॥ विविच्यते इति । उक्तमर्थं
निगमयति ॥ सदमपीति ॥ ८६ ॥ ननु द्वैतादर्शनशादिनात्मदर्शनवतो योगित्वमेव न विवेकितेतिशं
कते ॥ सदापश्यतीति ॥ इष्टापत्त्या परिहरति ॥ तर्हीति ॥ अध्यायतात्पर्यं संक्षिप्य दर्शयति ॥ ब्र

विविच्यते तदस्मात्तु निरद्वैतानंदनामके ॥ अध्याये हि तृतीये तत्सर्वमप्यतिमंगलं ॥ ८७ ॥
सदा पश्यन्निजानंदमपश्यन्निखिलं जगत् ॥ अर्थाद्योगीति चेत्तर्हि संतुष्टो वर्धतां भवा
न् ॥ ८८ ॥ ब्रह्मानंदाभिधे ग्रंथे मंदानुग्रहसिद्धये ॥ द्वितीयेऽध्याय एतस्मिन्नात्मानंदो विवेचि
तः ॥ ८९ ॥ ॥ इति आत्मानंदः समाप्तः ॥

ह्मानंदेति ॥ ८९ ॥ ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीभारतीतीर्थविद्यारण्यमुनिवर्यकिं
करेण रामकृष्णाख्यविदुषा विरचिते ब्रह्मानंदे आत्मानंदो नाम द्वितीयोऽध्यायः ॥ २ ॥ ॥

आत्मा॰ १८